शातातपोक्तं "एतस्मिन्नेव संप्राप्ते वसित्वा गर्द्दभाजिनम् । सप्तवानचरेत् भैक्ष्यं स्वकर्म्म परिकीर्त्तयन् । तेभ्यो लब्धेन भैक्ष्येण वर्त्तयन्नेककालिकम् । उपस्पृशंस्त्रिसवनमेनस स विशुध्यति" मनूक्तं अवकीर्णिव्रतमुपक्रम्य 'तत्र प्रायश्चित्तं महाव्याहृतिभिर्जुहूयात् ओङ्कारपूर्व्विकाभिः । संवत्सरं वा नक्तं भैक्ष्यं चरेत् चतुर्थकाले मितभुग् गायत्रीं वत्सरानुगां जपेदिति" शङ्खलिखितोक्तं च "अवकीर्ण-निमित्तन्तु ब्रह्महत्याव्रतञ्चरेत् । खरचर्म्मवासा षण्मासामासां-स्तस्मात् मुच्येत किल्विषात्" अङ्गिरसोक्तं च व्रतभेदे । एतस्य विषयभेदः प्रायश्चित्तविवेकतोऽवसेयः ।

**अवकुटार** त्रि० अव+स्वार्थे अतिशये वा कुटारच् अत्यन्तनिम्नादौ १अवशब्दार्थे २वैरूप्ये न० ।

**अवकृष्ट** त्रि० अव+कृष–क्त ।१दूरीकृते२अपसारिते, ३वहिष्-कारिते च । अवकृष्ट' गृहावकरादेरवकर्षणमस्त्यस्य अर्श० अच् ।४गृहावकरमार्जके दासभेदे पु० । "पणोदेयोऽवकृष्टस्य षड्डुत्कृष्टस्य वेतनम् । षाण्मासिकस्तथाच्छादो धान्य द्रोणस्तु मासिकः" मनुः । "अवकृष्टस्य गृहादिसंमार्जको-दकादिवाहादेः कर्म्मकरस्य कृत्स्न्" ० ।

**अवकृष्य** त्रि० अव+कृष कर्म्मणि क्यप् । १आकर्षणीये २दूरी-कार्ये अव+कृष ल्यप् । ३आकृष्येत्यर्थे अव्य० ।

**अवक्लृप्ति** स्त्री अव+क्लृप–क्त रोलः । सम्भावनायाम् "अनवक्लृप्त्य मर्षयोः" पा० "अनवक्लृप्तिरसम्भावना" सि० कौ० "कोव भोक्ष्यसे अनवक्लृप्तावेव" सि०कौ० ।

**अवकेशिन्** त्रि० अवच्युतं कं सुखं यस्मात् प्रा० ब० अवकं फलम्शून्यतासीशित्वं शीलमस्य अवक+ईश–णिनि । १अफले वृक्षे । अवसन्नाः केशा विद्यन्ते अस्य इनि । २अल्पकेशयुक्ते । [लया कृष्टे ।

**अवकोकिल** त्रि० अवकृष्टः कोकिलया प्रा० स० । कोकि-

**अवक्तव्य** त्रि० न वक्तव्यः । १वक्तुमनर्हे अश्लीलादौ वाक्ये २निषिद्धवचने ३मिथ्याभूते च ।

**अवक्त्र** त्रि०नास्ति वक्त्रं यत्र । सुश्रुतोक्ते शोणितादिनिस्सारण मुखशून्ये व्रणादौ "अन्तःपूयेष्ववक्त्रेषु तथैवोत्सङ्गवत्-स्वपि । नेत्रवर्त्मगुदाभ्यासनाड्योऽवक्त्राः सशोणिताः" ।

**अवक्र** त्रि०विरोधे न०त० । वक्रताविरोधिनि सारल्ययुक्ते ।

**अवक्राक्षिन्** त्रि० अव+क्रम णिनि ष्ट० । अकर्षणशीले "अवक्राक्षिणं वृषभं यथा जुरम्" ऋ०८,१,२, अवक्रा-क्षिणमवकर्षणशीलम्" भा० ।

**अवक्रन्द** त्रि० अव+क्रन्द कर्त्तरि अच् । १नीचैः क्रन्दनशीले "क्रन्दते स्वाहाऽवक्रन्दाय स्वाहा" य०२२ ७। भावे घञ् नीचैः २क्रन्दने पु० । भावे ल्युट् अवक्रन्दनमप्यत्र न० ।

**अवक्रम** पु० अव+क्रम–भावे घञ् । अवक्रमणे निम्नगतौ

**अवक्रय** पु० अवक्रीयते प्रतिरूपदानेन स्वाधीनं क्रियतेऽनेन अव+क्री–अच् ।ग्राहकस्य प्रतिरूपत्वेन देये१मूल्ये२भाटके च भाटकञ्च गृहवस्त्रादिवस्तुनः एतावत् उपभोगे धनं ग्राह्य मिति समयेन परायत्तीकरणम् करणेऽच् । ३तत् साधने द्रव्ये शुल्कादिस्थाने वणिग्भिर्नृपाय देये (माशुल) ४करे च ।

**अवक्रान्ति** स्त्री अव+क्रम–क्तिन् । निम्नक्रमणे अधोगमने ।

**अवक्रुष्ट** त्रि० अव+क्रुश–कर्म्मणि क्त । कृताक्रोशे यमुद्दिश्य क्रोशः कृतस्तस्मिन् । "अवक्रुष्टः कोकिलया" सि०कौ० ।

**अवक्लिन्न** त्रि० अव+क्लिद–क्त ।पाकादधस्तात् १क्लिन्ने (पचा) १फलादौ जलादिना २अत्यन्तार्द्रे च । पूर्व्वं पक्वं ततोऽवक्लिन्नं राज० पूर्व्वनि० । अवक्लिन्नपक्वम् ।

**अवक्लेद** पु०अव+क्लिद–भावे घञ् । पाकोत्तरं क्लेदे (पचा-इक्षोया) क्लेदश्च जलविशेषसंयोगेन वस्तुनो नाशजनकः अवयवसंयोगशैथिल्यसंपादको व्यापारः ।

**अवक्षय** पु० अव+क्षि–भावे अच् । ह्रस्वतरं नाशोन्मु-खावस्थायां भावविकारभेदे ।

**अवक्षयण** न० अव+क्षि–णिच्–भावे ल्युट् । अवक्षय-साधने व्यापारभेदे । "आह्वर्णा उल्मुखावक्षयणमकृत" शत०ब्रा० । [यस्यावक्षेपः कृतस्तस्मिन् ।

**अवक्षिप्त** त्रि० अव+क्षिप–कर्म्मणि क्त । कृतावक्षेपे वस्तुनि

**अवक्षीण** त्रि० अव+क्षि–क्त । १अवक्षयप्राप्ते विनाशोन्मुखे पदार्थे । भावे क्त । २अवक्षये न० ।

**अवक्षुत** त्रि० अव+क्षु–क्त । उपरि कृतक्षुते । यस्योपरि क्षुतं कृतं तस्मिन् । "द्विषदन्नं नगर्यन्नं पतितान्नमवक्षुतम्" मनुः ।

**अवक्षेपण** अव+क्षिप–भावे ल्युट् । अधःसंयोगानुकूले-क्रियाभेदे । "मुसलमवक्षिपामीतीच्छाजनितेन प्रयत्नेन प्रयत्नवदात्मसंयोगरूपादसमवायिकारणात् हस्ते क्रिया जायते ततोऽवक्षेपणविशिष्टहस्तनोदनादसमवायिकार-णात् हस्तसंयुक्तमुसलेऽप्यवक्षेपणं कर्म्म युगपद्वा जायते" वै०सू०उ० उक्तं ज्ञेयम् । "उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्म्माणि" वैसू०"उत्क्षेपणं तथा-वक्षेपणमाकुञ्चनं तथा । प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च" भाषा० । भावे घञ् । अवक्षेपोऽप्यत्रार्थे । करणे ल्युट् ङीप् । २बलायामोषधौ स्त्री ।

**अवखात** न० निम्नः खातः । गभीरगर्त्ते ।